ब्रह्मप्रज्ञा {BrahmaPrajna}
(A Multidisciplinary and Multilingual Peer-reviewed Journal)
Published by: Vedanta Vibhag, Valmeeki Vidyapeeth,
Email: vedantavibhag@gmail.com. ISSN: 2795-1960 (Print)

# हविर्यज्ञविमर्शः

**सहप्रा. तेजप्रकाशपौडेलः**
वाल्मीकिविद्यापीठम्
Email: tejprakashpaudel@gmail.com

**लेखसारः**

*'यज्ञो वै ब्रह्म' इति श्रुत्या प्रतिपादितायां वैदिकसनातनपरम्परायां यज्ञस्य महत्त्वं प्रतिष्ठितम्। यज्ञाः सर्वे वेदेभ्यो ब्राह्मणग्रन्थेभ्यश्च विधिप्रणीताः सन्तः आचार्यैः सम्यगनुष्ठीयन्ते। सनातनधर्मे यज्ञः सृष्टेः प्रथमं महाधनं दिव्यं निधानं च मन्यते। स यज्ञो लौकिके आध्यात्मिके च शमसौख्ये ददाति, पारलौकिकं मोक्षमार्गं च प्रकाशयति। ये श्रुतिप्रतिपादिता यज्ञविधयस्ते श्रौतयज्ञा इति कथ्यन्ते। श्रौतयज्ञानां संख्या मुख्यतश्चतुर्दश निर्दिष्टा। ते यज्ञा हवनीयद्रव्यभेदेन प्रमुखरूपेण हविर्यज्ञः सोमयज्ञश्चेति द्विधा विभज्यन्ते। हविर्यज्ञेषु दुग्धं घृतं पुरोडाशादीनि हव्यपदार्थानि एवम् अग्न्याधानम्, अग्निहोत्रम्, दर्शपूर्णमासौ, आग्रहायणम्, चातुर्मास्यानि, निरूढपशुबन्धः, सौत्रामणियज्श्चेति सप्तयज्ञा अभिधीयन्ते। ते यज्ञा न केवलं कर्मकाण्डमात्रं किं तु दार्शनिकं सामाजिकं वैज्ञानिकञ्च तत्त्वमनुयान्ति। वैदिकैर्ऋषिभिर्यज्ञो ब्रह्मणो लिङ्गं विश्वस्य धारकञ्चेति निगदितम्। यज्ञेन देवताः प्रसीदन्ति, सृष्टेः स्थितिर्भवति, ऋतस्य प्रवाहः सततमविच्छिन्नो भवति। यत्र यज्ञे देवताः प्रति वनस्पतयो हविर्द्रव्याणि घृतं च निर्वाप्यन्ते तत्राभिघृतहोमधूमरश्मिभिर्वातावरणे शुभा ऊर्जा पावन्यः शक्तयश्च व्यज्यन्ते। तस्मात् देवताः प्रीता भूमौ वर्षं ददति, भूमिमुर्वरां कुर्वन्ति, समृद्धिं च जनयन्तीति वैदिकं प्रतिज्ञानम्। यज्ञ आत्मविशुद्धये सामाजिकसौहार्दाय पर्यावरणसन्तुलनाय धर्मसंरक्षणाय च महान् हेतुरिति परं मतम्। अतो वेदा यज्ञं कर्मयोगस्य परं साधनमिति स्तुवन्ति। एतदेव वैदिकसत्यमस्मिन् आलेखे सोपपत्ति प्रतिपादितमस्ति।*

**बीजशब्दाः**– दर्शपूर्णमासः, निरूढपशुबन्धः, यज्ञः, श्रौतः, हव्यपदार्थः।

## १. विषयपरिचयः

ये वैदिकयज्ञानां विषये गभीरां रुचिं वहन्ति अनधीतश्रौतकल्पा जिज्ञासवस्ते पाठका हविर्यज्ञानां स्वरूपं कीदृश-मस्तीति साधु अवगन्तुं कथं सुगमतया शक्नुयुरिति तेभ्यो विषयेऽस्मिन् कथं सूचना प्रदेयेति अस्य आलेखस्य मुख्या समस्या वर्तते। अस्याः समस्यायाः समाधानार्थं वैदिकवाङ्मये प्रतिपादितानां हविर्यज्ञानां विधानं स्वरूपं स्वभावं च सम्यगनुसन्धाय वैदिकयज्ञस्य विषये जिज्ञासूनां जिज्ञासापरिशमनार्थमयमालेखो विरचितो वर्तते। अतो हविर्यज्ञानां यथार्थस्वरूपप्रदर्शन-मेवास्य लेखस्योद्देश्यमस्ति। वैदिकवाङ्मये यज्ञस्य अतिमहत्त्वपूर्णं स्थानं प्रतिष्ठितम्। मानवस्य सभ्यताविकासेन सह धार्मिकाः संस्कारा अनुष्ठानानि यज्ञानां परम्परा च क्रमशः प्रवृद्धा। यज्ञस्य मनुष्येण सह सम्बन्धः सृष्टेः प्राक्कालादेव विद्यते

इति तथ्यं श्रीमद्भगवद्गीतायामपि निर्दिष्टम् ।[१] 'यज्ञ' इति शब्दः 'यजदेवपूजासंगतिकरणदानेषु' इत्यस्य धातोः नङ्-प्रत्यय-योगेन निष्पन्नः ।[२] अस्यार्थो दानधर्मलोकोपकारादिकं शुभकर्म अथवा देवतानां प्रीत्यर्थं वैदिकविधिना क्रियमाणा हवन-पूजाजपपाठादिरूपा धार्मिकक्रिया इति भवति । पद्मपुराणस्य सृष्टिखण्डेऽपि ब्रह्मणा मनुष्यजातिर्यज्ञकर्मसाधनाय सृष्टेति कथितं विद्यते ।[३] तैत्तिरीयसंहितायामपि मनुष्यो जन्मत एव ऋषिदेवपितृऋणैर्ऋणितः, तेषु ऋणेषु ब्रह्मचर्येण ऋषिऋणस्य, यज्ञेन देवऋणस्य, संततिप्रजननेन पितृणस्य च परिहारो भवतीति निर्दिष्टमस्ति ।[४] एष एव अर्थः श्रीमद्भागवतेऽपि प्रति-पादितः ।[५] मनुरपि वेदाध्ययनम्, विवाहादिसंस्कारानुष्ठानम्, पुत्रजननम्, ज्योतिष्टोमादि-यज्ञानुष्ठानं च कृत्वा ऋणत्रयपरिहारं विधाय मोक्षमार्गे मनः स्थापनीयं इत्याह ।[६] शतपथब्राह्मणेऽपि प्रजापतिब्रह्मणा स्वप्रतिच्छायारूपेण यज्ञस्योत्पत्तेर्वर्णनाद्यज्ञो भगवतः साक्षाद्रूपमिति स्थितिः प्रतिपाद्यते ।[७]अतः श्रुतिस्मृतिपुराणेषु सर्वेषु यज्ञो मनुष्यकृतानां कर्मणां प्रधान इति प्रतिपाद्यते । यः पुरुषो यज्ञं न करोति स आत्मशौचाभावेन इह परत्र च सुखं न प्राप्नोति पर्णं यथा वृक्षात् पतितं नश्यति तथा स भवतीति श्रुतेर्वचनं विद्यते ।[८] मत्स्यपुराणेऽपि देवताहवनीयद्रव्यवेदमन्त्रऋत्विजो दक्षिणानां च संयोगो यज्ञ इति व्याख्यातं वर्तते ।[९] तस्माद् आधिभौतिक-आधिदैविक-आध्यात्मिकदुःखानां निवारणाय देवताप्रीत्यर्थं लोककल्याणाय स्वर्गमार्ग-सौकर्याय च यन्महानुष्ठानं विधीयते स एव यज्ञ इति स्पष्टम् ।

## २. अध्ययनविधिः

वैदिकयज्ञानां शास्त्रोक्तविध्यनुसारेण सम्पादनादस्मिन् आलेखे विषयविश्लेषणाय निगमनविधिरवलम्बितो वर्तते । शास्त्रसरणिमनुसृत्य विषयप्रतिपादनार्थं पुस्तकालयादावश्यकसामग्रीः सङ्कलय्य अध्ययनं प्रपूरितमस्ति । आवश्यकतानुसारं व्याख्यात्मकविधिश्च प्रयुक्तो वर्तते ।

## ३. सैद्धान्तिकपर्याधारः

अस्मिन् 'हविर्यज्ञविमर्शः' शीर्षकालेखस्य सैद्धान्तिकपर्याधारे हविर्यज्ञानां स्वरूपम्, तेषां वैदिकयज्ञव्यवस्थायां स्थानं च निरूपितम् । अग्निहोत्रम्, दर्शपूर्णमासः, चातुर्मास्यम्, पशुबन्धश्चेत्यादीनां हविर्यज्ञानां संहिता-ब्राह्मण-श्रौतसूत्रेषु विधानं प्राप्यते । तदनुसारमेव पद्धतयो निर्मेयाः, शास्त्रीयं विवेचनं चात्र कर्तव्यम् । हविर्यज्ञा वैदिकधर्मस्य आधाराः सन्ति तथा लौकिक-आध्यात्मिकसामञ्जस्यसाधकाश्च भवन्ति । ब्राह्मणग्रन्थैः, श्रौतसूत्रैः, शोधलेखैश्च तुलनात्मक-ऐतिहासिक-

१. सहयज्ञाः प्रजाः सृष्ट्वा पुरोवाच प्रजापतिः । अनेन प्रसविष्यध्वमेष वोऽस्त्विष्टकामधुक् ॥
देवान् भावयतानेन ते देवा भावयन्तु वः । परस्परं भावयन्तः श्रेयः परमवाप्स्यथ ॥ (श्रीमद्भगवतगीता, ३।१०-११)

२. यजजयाचयतविच्छप्रच्छरक्षो नङ् । (पा.सू. ३।३।९०)

३. यज्ञनिष्पत्तये सर्वमेतद् ब्रह्मा चकार ह । चातुर्वर्ण्यं महाभाग यज्ञसाधनमुत्तमम् ॥ (पद्मपुराणम्, ३।१२३)

४. जायमानो वै ब्राह्मणस्त्रिभिर्ऋणैर्ऋणवान् जायते ब्रह्मचर्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्यः । (तैत्तिरीयसंहिता, ३।१०।५)

५. ऋणैस्त्रिभिर्द्विजो जातो देवर्षिपितृणां प्रभो । यज्ञाध्ययनपुत्रैस्तान्यनिस्तीर्य त्यजन् पतेत् ॥ (श्रीमद्भागवतमहापुणम्, १०।८४।३९)

६. ऋणानि त्रीण्यपाकृत्य मनो मोक्षे निवेशयेत् । अनपाकृत्य मोक्षं तु सेवमानो व्रजत्यधः ॥
अधीत्य विधिवद्वेदान्पुत्रांश्चोत्पाद्य धर्मतः । इष्ट्वा च शक्तितो यज्ञैर्मनो मोक्षे निवेशयेत् ॥ (मनुस्मृति, ६।३५-३६)

७. अथैनमात्मनः प्रतिमामसृजत यद् यज्ञम्, तस्मादाहुः प्रजापतिर्यज्ञ इत्यात्मनो ह्येनं प्रतिमामसृजत ॥ (शतपथब्राह्मणम्, ११।१।८।३)

८. नास्त्ययज्ञस्य लोको वै नायज्ञो विन्दते शुभम् । अयज्ञो न च पूतात्मा नश्यति छिन्नपर्णवत् ॥ (द्र.– कल्याण, वेदकथाङ्क पृ० ३३९)

९. देवानां द्रव्यहविषां ऋक्सामयजुषां तथा । ऋत्विजां दक्षिणानां च संयोगो यज्ञ उच्यते ॥ (मत्स्यपुराणम्)

दार्शनिकदृष्ट्या परीक्षणं कृत्वायमालेखो रचितः। एते यज्ञाः केवलं कर्मकाण्डरूपा न अपि तु यज्ञव्यवस्थायाः, पर्यावरणसम्बन्धस्य, सामाजिकसामञ्जस्य च द्योतका इति बोधः प्राप्तः। हविर्यज्ञा वैदिकसंस्कृतेः प्राणरूपाः सन्ति, ये मानवजीवनस्य धर्मार्थ-काम-मोक्षसमन्वयस्य साधनानि भवन्ति।

## ४. विमर्शः परिणामश्च

सकामनिष्कामभावेन परमेश्वरदेवतादीनामाराधनं धार्मिकानुष्ठानं वा यज्ञ इति परिभाष्यते। यज्ञस्योत्पत्तिर्वेदैः सहाऽभूतदिति ऋग्वेदस्य ऋचासु दर्शितम्।[१०] देवाः पूज्यत्वाद् यजुर्वेदे यज्ञनामभिः सञ्चोदिताः।[११] अथर्ववेदानुसारेण यज्ञस्य प्रथमो विस्तारकर्ता अथर्वा ऋषिरस्ति।[१२] अङ्गिरसस्तु यज्ञानां उपयोगितां चिन्तयित्वा अन्नादिरसं प्राप्नुयुरिति अथर्ववेदस्य कथनमस्ति।[१३] श्रीमद्भागवतमहापुराणे स्वायंभुवमनोः पत्न्याः शतरूपाया गर्भजाताया आकूते रुचेः प्रजापतिना सह विवाहो निरूपितः। तयोः संयोगात् चतुर्विंशत्यामवतारेषु सप्तमोऽवतारो यज्ञपुरुषो नारायणः प्रादुरभूत्। तस्य अवतारादेव यज्ञानां प्रचारः प्रवृत्त इति वर्ण्यते।[१४] एवमुत्पन्नो विकसितश्च यज्ञः श्रुतिषु पञ्चधा विभक्तो वर्तते।[१५] स्मृतिषु तु पाकयज्ञो हविर्यज्ञः श्रौतयज्ञ इति त्रिधा विभज्य एकविंशतेर्यज्ञानां विभागः कृतः।[१६] एते एकविंशतिर्यज्ञाः श्रौतस्मार्तभेदेन द्विधा व्यवस्थिताः। स्मार्तेषु स्मृतिप्रणीताः सप्त पाकयज्ञाः श्रौतेषु श्रुतिप्रणीताश्चतुर्दश यज्ञाः। श्रौतयज्ञानां हवनीयद्रव्यविभागेन हविर्यज्ञाः (दुग्ध-घृतपुरोडाशादिहविषां युक्ताः) सोमयज्ञाः (सोमलतारसयुताः) इति पुनर्द्विधा विभागः कृतोऽस्ति। अन्ततो यज्ञाः स्वभावतः पाकयज्ञ-हविर्यज्ञ-सोमयज्ञ इति त्रिषु संस्थासु विभज्यन्ते। एतासु संस्थासु पाकयज्ञसंस्थाया विवेचनमस्या एव पत्रिकायाः पूर्वाङ्के कृतम्। एतदीये आलेखे श्रौतयज्ञानामन्तर्गतं हविर्यज्ञसंस्थायाः सप्तानां यज्ञानां विषये विवेचनं निबद्धमस्ति ।

### ४.१ हविर्यज्ञसंस्था

ये हव्यपदार्थेन हविर्भिरग्नौ विनियुज्यन्ते ते यज्ञा हविर्यज्ञा इति प्रोच्यन्ते। हविर्यज्ञा न केवलं धार्मिकक्रियामात्रम् अपि तु सांस्कृतिकस्य पर्यावरणीयस्य च हितार्थं प्रतिष्ठिता वैदिकपारम्परिका महायज्ञानां संस्थाः। यज्ञपरम्परायां हविर्यज्ञसंस्था विशेषसंस्था अस्ति। तत्र घृत-शाक-धान्य-तिल-पिष्टपाकादिहव्यपदार्था अग्निदेवतायै दीयन्ते ये च वह्निना देवतासु प्रेष्यन्ते। सोमयज्ञानां संस्थाया अपेक्षया हविर्यज्ञानां प्रणाली सुगमा, व्यापकत्वेन युक्ता, गृहस्थाश्रमिणां च अनुकूला मन्यते। न केवलं देवतापूजार्थम् एते हविर्यज्ञा अपि तु प्रकृतिमनुष्ययोः सहसंबन्धं सम्यग्व्यवस्थातुम् ऋतुचक्रेण सह मानवजीवनं सङ्गच्छते इति हेतुना एतेषां महत्त्वमत्यधिकम्। अग्न्याधानम्, अग्निहोत्रम्, दर्शपूर्णमासौ, चातुर्मास्यम्,

---

१०. अग्निमीडे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्॥
अग्निः पूर्वेभिर्ऋषिभिरीड्यो नूतनैरुत। स देवाँ एह वक्षति॥ (ऋग्वेद, १।१।१-२)

११. यज्ञेन यज्ञमयजन्त देवाः (शुक्लयजुर्वेद, ३१।१६)

१२. यज्ञैरथर्वा प्रथमः प्रथस्तते। (अथर्ववेद, २०।२५।५)

१३. अङ्गिरसः यज्ञस्य धाम प्रथमं मनन्त। (अथर्ववेद, २०।९१।२)

१४. श्रीमद्भागवतमहापुराणम्, (४।१४।१८-१९)।

१५. स एष यज्ञः पञ्चविधः, अग्निहोत्रं, दर्शपूर्णमासौ चातुर्मास्यानि पशुः सोमः। (ऐतरेयब्राह्मणम्, २।३)

१६. अष्टका पार्वणः श्राद्धं श्रावण्याग्रहायणी चैत्र्याश्वयुजीति सप्त पाकयज्ञसंस्थाः, अग्न्याधेयमग्निहोत्रं दर्शपूर्णमासावाग्रयणं चातुर्मास्यानि निरूढपशुबन्धः सौत्रामणीति सप्त हविर्यज्ञसंस्थाः, अग्निष्टोमोऽत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोऽतिरात्रोऽप्तोर्याम इति सप्त सोमसंस्थाः। (गौतमधर्मसूत्रम्, ८।१९-२१)।

आग्रयणेष्टिः, निरूढपशुबन्धः, सौत्रामणिश्चेति सप्त यज्ञा हविर्यज्ञानां संस्थायां प्रतिष्ठिताः। एषु प्रतियज्ञं बहवो भेदा उपभेदाश्च श्रौतसूत्रेषु दृश्यन्ते। हविर्यज्ञानां संस्थान्तर्गतानां यज्ञानां सामान्यः परिचयोऽधः प्रस्तूयते।

### ४.१.१ अग्न्याधानम्

अग्न्याधानं नाम वैदिकयज्ञकर्तुराधारभूतस्तम्भ इति श्रूयते। तस्मादेव सर्वैर्वेदैः प्रकल्पिता यज्ञाः प्रवर्तन्ते। यथा दीपप्रज्वलनं तमो निवार्य प्रकाशं जनयति तथा अग्न्याधानक्रिया आध्यात्मिकं तमो निवार्य ब्रह्मवर्चसं वर्धयति, धर्मस्य मार्गं च प्रकाशयति। तस्माद् अग्न्याधानं महत्त्वपूर्णः पवित्रश्च श्रौतसंस्कार इति मन्यते। अग्न्याधानं नाम अग्नेराधानं प्रतिष्ठा वेति बोध्यते। एषा क्रिया अमावास्यायां विहिता।[१७] अस्याधानं ब्रह्मवर्चसकामस्य ब्राह्मणस्य हस्तानक्षत्रे वसन्ते, लक्ष्मी-कामस्य क्षत्रियस्य ग्रीष्मऋतौ चित्रानक्षत्रे, कामनाशून्यस्य वैश्यस्य प्रजापशुकामिनां रथकारस्य च वर्षासु इति श्रुतिषु निर्दिष्टमस्ति।[१८] विवाहसंस्कारस्य अनन्तरं पुत्रप्राप्तेः पश्चाद् गृहस्थाश्रमस्य प्रारम्भो भवति। तदा त्रैवर्णिका जना ब्राह्मण-क्षत्रियवैश्याः सपत्नीकं अग्न्याधानं कर्तुं शक्नुवन्ति। एवं प्रतिष्ठितेषु गार्हपत्य-दक्षिण-आहवनीयेषु त्रिषु अग्निषु गार्हपत्याग्निस्तु गृहस्थेन जीवनपर्यन्तमवश्यं धारणीयः। दक्षिणाग्निराहवनीयाग्निश्च कर्मसमाप्तेरनन्तरं त्यक्तुमपि शक्येते[१९]। तथा कृते अन्यानि कर्माणि कर्तुं पुनर्गार्हपत्याग्निराहरणीयः, स्वकुण्डे स्थापयितव्यश्च।

अग्न्याधानं मुख्यतो गार्हपत्य-आहवनीय-दक्षिणाग्निरूपेण त्रिधा भवति। अयं संस्कारः श्रौतपद्धत्यां परमं महत्त्वमधिगच्छति। एतेषामग्नीनामाधानात् पूर्वं स्नानम्, भूमिशुद्धिः, मन्त्रदीक्षा इत्यादीनि विशेषकर्माणि करणीयानि भवन्ति। तत्पश्चात् मुख्यतया गार्हपत्याग्नेर्दक्षिणाग्नेराहवनीयाग्नेश्च स्थापनां कृत्वा मन्त्रोच्चारणसहितम् ऋत्विजां मार्गदर्शनेन अग्नेः प्रतिष्ठा क्रियते। सभ्याग्नेश्च स्थापनां केचित् कुर्वन्ति केचित् न कुर्वन्ति। अत्र विशेषतो यजुर्वेदीयमन्त्राणां प्रयोगः सामगानस्य च विधानं दृश्यते। एतेन गृहस्थजीवनस्य आधिकारिक आरम्भो मन्यते। अत एव अग्न्याधानं न केवलं धार्मिकमनुष्ठानं अपि तु आत्मशुद्धेः, जीवनं प्रति उत्तरदायित्वबोधस्य, धर्ममार्गस्य च आरम्भोऽपि भवति। अयं धार्मिक आध्यात्मिकश्च संस्कारो व्यक्तिं यज्ञे, पूजायां होमादिषु कर्मसु च प्रवर्तयति।

### ४.१.२ अग्निहोत्रम्

अग्नेः प्रथमा आहुतिर्देवतायै समर्प्यमाणा भवति, तस्मात् कर्मणोऽस्य अग्निहोत्रमिति नाम प्रसिद्धम्। यजमानोऽध्वर्युं 'उद्धर' इति प्रैषवाक्यं ब्रूयात्, तदनन्तरं सायंप्रातः कालयोर्होमः क्रियते।[२०] यदि स्वयं यजमान एव हविर्निरूपणं करोति, तर्हि तस्य प्रैषवाक्यस्य आवश्यकता न भवति। यः सपत्नीकं गार्हपत्याद्यग्न्याधानं कृतवान् त्रैवर्णिको (ब्राह्मणः, क्षत्रियः, वैश्यः) स एवाग्निहोत्रहवने अर्हः। एतेषां कर्मणां संख्या वेदेभ्योऽसङ्ख्या दृश्यते तेषु अग्निहोत्रम् आद्यं प्रमुखं च कर्म मन्यते। एतत् कर्म जीवनपर्यन्तं वा विंशतिवर्षपर्यन्तं वा नित्यतया कर्तव्यम्। अस्य होमस्य आरम्भः सायं काले भवति, समाप्तिरपि सायं काले एव। यदा सूर्यस्य किरणा भूमिम् अलङ्कर्तुं न शक्ता भवन्ति तदा सायंहोत्रम्, यदा प्रातः सूर्यकिरणाः सम्पूर्णतया दृश्यन्ते तदा प्रातः होत्रमिति विज्ञायते।

---

१७. अमावास्यायामग्न्याधेयम्। (कात्यायन-श्रौतसूत्रम्, ४।७।१)

१८. हस्तो लाभकामस्य। चित्रा च क्षत्रियस्य। वसन्तो ब्राह्मणब्रह्मवर्चसकामयोः। ग्रीष्मः क्षत्रियश्रीकामयोः। वर्षाः प्रजा-पशुकाम-वैश्य-रथकृताम्।" (कात्यायन-श्रौतसूत्रम्, ४।७।३-७)

१९. द्रष्टव्यः– वैदिक धर्म मूल रूपमा (तृ.सं. २०८०, पृ. ८३१)।

२०. 'उद्धरे'ति यजमानो ब्रूयात्सायं प्रातरग्निहोत्रे। (कात्यायन-श्रौतसूत्रम्, ४।१३।१)

एष होम उदिते अनुदिते चेति द्विधा निर्दिश्यते। बौधायन-कात्यायन-छान्दोग्यपरम्पराया अनुयायिनोऽनुदितसूर्ये काठक-तैत्तिरीय-मैत्रायणीयादिशाखानुगा उदितसूर्ये होमं कुर्वन्ति। सर्वाण्यपि अग्न्याधानादिकानि हवनानि सूर्योदयात् सूर्यास्ताच्च पूर्वमेव कर्तव्यानि। गृहस्थोऽपि सूर्यस्योदय-अस्तमानयोः पूर्वं गार्हपत्याग्नेरग्निम् आदाय आहवनीय-दक्षिणाग्न्योः पुनः प्रतिष्ठापयेत्। ततः स्वशाखानुसारमुदितानुदितसूर्ये अग्निहोत्रं विधीयते। सायंकाले यजमानः संस्कारपूर्वकं गार्हपत्योद्धृतं पय आहवनीयाग्नौ जुहोति, एषा प्रथमा आहुतिर्रग्निदेवतायै समर्पिता। अनन्तरं द्वितीयामाहुतिं ददाति एषा द्वितीया आहुतिः प्रजापतये इति। एवमेव प्रातःकाले प्रथमाहुतिः सूर्याय, द्वितीयाहुतिः प्रजापतये इति। एते हि चतस्र आहुतयोऽग्निहोत्रस्य मुख्याहुतयः सन्ति। यद्यपि वेदेषु अग्निहोत्रविषये नानाविधानि मतानि दृश्यन्ते।

केचित् आहुः– गार्हपत्यदक्षिणाग्न्योः सायंकाले चतस्रश्चतस्रः आहुतयः, प्रातःकाले अष्टौ इति षोडश, पूर्वोक्तैश्चतुर्भिः सह विंशतिराहुतयः स्यु इति। अपरे आहु एते विंशतिरूपा एवाग्निहोत्रसंज्ञां लभन्तामिति। मीमांसका अपि एतन्मतं स्वीचक्रिरे। अग्निहोत्रं सायंप्रातः यजमानेनैव करणीयम्। यदि केनचित् कारणेन स स्वयं न शक्नोति तर्हि स्वसन्तानम् ऋत्विजं वा प्रेषयेत्। पूर्णिमायां निशि अमावास्यायां वा यजमानः स्वयमेव हविर्निरूपणं कुर्यात्। अत्र दुग्धम्, दधि, यवागूर्नित्यं हव्यद्रव्यत्वेन निर्दिष्टाः। यः पशुकामः स्वर्गकामो वा स दुग्धेन जुहोति। ग्रामसमृद्धिकामो यवाग्वा, बलकामस्तण्डुलैः, इन्द्रियबलकामो दध्ना, तेजस्कामश्च घृतेन जुहोति। त्रैवर्णिकगृहस्थः कथञ्चन अग्निहोत्रविहीनो न भवेत्। यावज्जीवनम् अग्निहोत्रपालनमवश्यं कर्तव्यम्। अग्निहोत्रविहीनेन तु न कश्चन यज्ञः, न कश्चन धर्मः, न च कश्चिद् होमः सम्यग् विधातुं शक्यते।

### ४.१.३ दर्शपौर्णमासः

वैदिकसनातनयज्ञपरम्परायां दर्शपौर्णमासयोरत्यन्तं महत् स्थानं दृश्यते। अमावास्यायां पौर्णमास्यां च अग्नये विष्णवे च हविस्समर्पणेन यो यज्ञः क्रियते स प्रमुखो हविर्यज्ञ उच्यते। संस्कृते 'दर्श' शब्दोऽमावास्याम्, 'पौर्णमास' शब्दश्च पूर्णिमां द्योतयति। तस्मादमावास्यापूर्णिमयोरुत्थितत्वादस्य यज्ञस्य 'दर्शपौर्णमास' इति संज्ञा भवति। अस्य निर्देशः श्रौतसूत्रेषु ब्राह्मणग्रन्थेषु च विस्तरेण कृतोऽस्ति। वैदिकसनातनयागपद्धतौ यो यज्ञोऽनिवार्यत्वेन निर्दिष्टः स एव अयं दर्शपौर्णमास इति। तस्य प्रमाणं वेदेषु, ब्राह्मणेषु, श्रौतसूत्रेषु, पुराणेषु च प्रस्तुतमस्ति। एष यज्ञः सपत्नीकेन यजमानेन श्रौताग्निषु ऋत्विजां सहयोगेन करणीयः हविर्यज्ञसंस्थान्तर्गतो वर्तते। सर्वकामनापूर्त्यर्थं पितॄन् देवाँश्च प्रीणयितुं नियतकालऽयममावास्यायां पौर्णमास्यां च अवश्यं विधेयः। कात्यायन आह– त्रिंशद्वर्षपर्यन्तमयं यज्ञः कर्तव्यः।[२१] आपस्तम्बस्तु जीवनपर्यन्तं त्रिंशद्वर्षपर्यन्तं वा वयोवृद्धत्वं यावत् स्वर्गकामेन करणीय इति मन्यते।[२२] दर्शपूर्णमासं विना सोमयागस्य अधिकारो न भवति। अयं यज्ञः प्रकृतियज्ञ इति कथ्यते। यतोऽनेन मनुष्यः कर्तव्यनिष्ठः संयतात्मा सत्यव्रती च भवति। गोपालन-गोरक्षणे च अभिरुचिं प्राप्नोति। अस्मिन् विधौ दर्शेष्टिः पूर्णमासेष्टिश्च पृथक्फलप्रदे द्वे इष्ट्यौ न स्तः। अमावास्यायां सूर्यचन्द्रमसोः संनिकर्षात् एष यज्ञो विधानतः क्रियते। विशेषतो ब्राह्मणवर्गस्य एषः अनिवार्येषु नित्येषु यज्ञेषु प्रमुखः। अयं गृहस्थानां नित्यकर्म इति निर्दिष्टम्। अस्याकरणे गृहस्थस्य पितृदोषो देवदोषः कर्मदोषश्चेति त्रिविधदोषः सम्भवतीति शास्त्रेषु निरूपितं वर्तते।

---

२१. त्रिंशतं वर्षाणि दर्शपूर्णमासाभ्यां यजेत्। (कात्यायन-श्रौतसूत्रम्, ४।२।४७)

२२. स्वर्गकामो दर्शपूर्णमासाभ्यां यजेत यावज्जीवम्, त्रिंशतं वा वर्षाणि, जीर्णो वा विरमेत्। (आपस्तम्ब-श्रौतसूत्रम्, ३।१४।१२-१३)

### ४.१.४ चातुर्मास्यम्

चतुर्षु मासेषु क्रियमाणं कर्म चातुर्मास्यमिति प्रथितम्। 'चातुर्मास्य'शब्देन वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीय-नामानि पर्वाणि विवक्षितानि।[२३] तत्र वैश्वदेवमाद्यं चातुर्मास्यपर्व भवति। अस्यानुष्ठानं फाल्गुन- पूर्णिमायां विधीयते। तत आषाढपूर्णिमायां वरुणप्रघासः, कार्तिकपूर्णिमायां साकमेधः, फाल्गुनशुक्लप्रतिपदि शुनासीरीयं पर्व क्रियते। चातुर्मास्यं द्विविधम्– राजसूयाङ्गं स्वतन्त्रञ्च। राजसूयाङ्गे तु क्षत्रियस्य राज्ञ एवाधिकारः, ब्राह्मण-वैश्ययोरधिकारो नास्ति। स्वतन्त्रचातुर्मास्ये तु ब्राह्मण-क्षत्रिय-वैश्यवर्णानां सर्वेषामधिकारोऽस्ति। अग्निहोत्र-दर्शपूर्णमाससदृशं प्रतिवर्षं नित्यतया कर्तव्यं पर्व एतत्। पूर्णिमायां क्रियते इति अस्य पर्वण इति नाम। प्रत्येकं पर्वणि चत्वारः ऋत्विजः, वरुणप्रघासे तु प्रतिप्रस्थाता नाम एकोऽतिरिक्तः ऋत्विग् भवति। चातुर्मास्ययज्ञस्य उत्सर्गानुत्सर्गपक्षौ स्तः। उत्सर्गपक्षे एकवारं कृत्वा तस्मात् कर्मणो निवृत्तिः। अनुत्सर्गपक्षे प्रथमं कृत्वा पञ्चवर्षपर्यन्तं वा अधिकवर्षपर्यन्तं पुनः पुनः तेनैव विधिना यज्ञः करणीयः। कश्चन सोमयागमिच्छति चेदुत्सर्गपक्षं गृह्णीयात्।

अयं यज्ञस्त्रिविधः– ऐष्टिकः, पाशुकः, सौमिकश्च। अस्य लेखस्य विषय ऐष्टिकचातुर्मास्ययागः। पाशुके यज्ञे हविर्द्रव्यस्य स्थाने पशुबन्धनं भवति, देवतास्तु तादृशा एव। सौमिके सोमरसः प्रधानं हविः, देवता ऐष्टिकयागवत् समानाः, सोमयागविधि-दीक्षा-प्रवर्ग्यादिसहितोऽनिवार्यः। ऐष्टिकचातुर्मास्येऽपि त्रयः पक्षाः– संवत्सरानुष्ठानपक्षः (एकवर्षीयः), पञ्चाहानुष्ठानपक्षः (पञ्चदिवसीयः), एकाहानुष्ठानपक्षः (एकदिवसीयः)। बौधायनादयो ऋषयो वदन्ति– प्रथमदिने वैश्वदेवः, द्वितीये वरुणप्रघासः, तृतीये चतुर्थे च साकमेधः, पञ्चमे शुनासीरीयम् इत्येष विधिः पञ्चाह इति कथ्यते। यदा सर्वाणि पर्वाणि एकस्मिन् दिने क्रियन्ते तदा एकाहविधिः। उभयोरपि विध्योर्देवता हविर्द्रव्यञ्च साम्यमावहन्ति। एकाहविधौ सर्वाणि मुख्यपर्वाणि पूर्णिमायामेव कर्तव्यानि तत्र मतभेदे सति वरुणप्रघासविधिर्ग्राह्य इति श्रुतिस्मृत्योर्मतम्। एतेषां पर्वणां स्वरूपमधः प्रदर्श्यते।

**(क) वैश्वदेवपर्व**

फाल्गुनपूर्णिमायामारभ्यते वैश्वदेवपर्व। कात्यायनः फाल्गुन्याः पूर्णिमायामेव अस्य पर्वारम्भस्य विधानं करोति।[२४] अस्यां तु चतुर्दश्यां पूर्वदिने अन्वारम्भण्येष्टिर्वा वैश्वानरपार्जन्येष्टिर्निर्वर्त्य[२५]प्रभातेऽहनि वैश्वदेवपर्वणः प्रवृत्तिर्भवति। अस्मिन् पर्वणि आग्नेय-सौम्य-सावित्र-सारस्वत-पौष्ण-मारुत-वैश्वदेव-द्यावापृथिव्यादयोऽष्टौ यागा भवन्ति। तत्र अग्नि-सोम-सवितृ-सरस्वती-पूष-मरुद्-विश्वेदेव-द्यावापृथिवीदेवताः प्रति अष्टकपालपुरोडाशः, चरुः, द्वादशकपाल-पुरोडाशः, चरुः, पिष्टचरुः, सप्तकपालपुरोडाशः, आमिक्षा, एककपालपुरोडाशश्चेति हव्यपदार्थाः क्रमशः हूयन्ते।[२६]

**(ख) वरुणप्रघासपर्व**

वरुणप्रघासो वैश्वदेवपर्वाषाढपूर्णिमायामारभ्यते। कात्यायन आषाढपूर्णिमायामेतस्य अनुष्ठानमारभेत इति निर्दिशति।[२७] अस्मिन् नव यागा भवन्ति– आग्नेयः, सौम्यः, सावित्रः, सारस्वतः, पौष्णः, ऐन्द्राग्निः, मारुतः, वारुणः,

---

२३. चतुर्षु मासेषु भवानि चातुर्मास्यानि कर्माणि। चातुर्मास्यशब्देन वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीयसंज्ञानि चत्वारि पर्वाणि अभिधीयन्ते। (कात्यायन-श्रौतसूत्रभाष्यम्, पृष्ठ १७८)

२४. चातुर्मास्यप्रयोगः फाल्गुन्याम्। (कात्यायन-श्रौतसूत्रम्, ५।१।१)

२५. वैश्वानर-पार्जन्यौ निरूप्येच्छन्। (कात्यायन-श्रौतसूत्रम्, ५।१।२)

२६. आग्नेयः, सौम्यश्चरुः, सावित्रो द्वादशकपालोऽष्टाकपालो वा, सारस्वतश्चरुः, पौष्णश्चरुः प्रपिष्टानान्। (कात्यायन-श्रौतसूत्रम्, ५।१।४)

२७. आषाढ्या'मयन्ते योनि'रिति समारोह्योदवसाय निर्मथ्य वरुणप्रघासाः। (कात्यायन-श्रौतसूत्रम्, ५।३।१)

कायश्च। उत्क्षिप्तदिक् प्रकृत्या उत्तरदक्षिणदिशोर्द्विवेदी विधीयेताम्। गार्हपत्यो दक्षिणाग्निश्चैकैकः स्थापनीयौ, आहवनीयस्तु उभयोर्वेद्योः पुरस्तात् संस्थाप्यते। नवमो यागो दक्षिणवेद्यां प्रतिप्रस्थात्रा क्रियते। अन्ये सर्वेऽपि यागा अध्वर्युणा उत्तरवेद्यां क्रियन्ते। प्रयाजादयोऽङ्गयागा उभयो वेद्योर्भवन्ति। उत्तरवेद्यामनुष्ठानं समन्त्रकम्, दक्षिणवेद्यां तु अमन्त्रकं भवन्ति। जुहू-उपभृतादयो होमपात्रविशेषाः पृथग्विधानतः सुवर्णमयाः शमीदण्डनिर्मिता वा कारयितव्याः। अस्मिन् ऋत्विजां मध्ये प्रतिप्रस्थाता नाम विशिष्टोऽधिकतया विहितः। अग्निः, सोमः, सविता, सरस्वती, पूषा, इन्द्राग्नी, मरुतः, वरुणः, क इति देवताः क्रमशः पूज्यन्ते। आमिक्षा-कायपुरोडाशादिहव्यपदार्थाश्चतुणां मासानां नाम्नि नभः, नभस्य, इष, ऊर्ज इत्युदीर्य आहूतिः प्रदीयते। ततः स्विष्टकृदीडाभक्षण-अनुयाज-वाजिनयागादिकर्मसु कृतवासरे अवभृथस्नानान्ते वरुणप्रघासपर्व समाप्तं भवति।

### (ग) साकमेधपर्व

वरुणप्रघासस्य पश्चात् कार्तिकशुक्लपूर्णिमायाः पूर्वदिने चतुर्दश्यां प्रातः काले साकमेधपर्वारम्भो भवति।[२८] अस्मिन् अनीकवतीष्टिः, महाहवींषिः, महापितृयज्ञः, त्र्यम्बकहवींषिश्च भवन्ति। अनीकवतीष्टौ 'अग्निरनीकवान्' देवता, 'अष्टकपालपुरोडाशः' हविर्भवति। सूर्योदयात्पूर्वमेव एतत्कर्म आरभ्यते। ततो मध्याह्ने सान्तपनीयेष्टिः क्रियते यत्र 'मरुतः सान्तपनाः' देवताः, हविश्च चरुर्भवति। सायं तु गृहमेधीयेष्टिर्देवता 'मरुतो गृहमेधिनः', हविः 'दुग्धपाकचरुः' भवति। तत्र यजमानो यथाशक्ति सर्वासां गवां दुग्धं दुग्ध्वा तेन सर्वकुटुम्बोपयोगाय चरुं पाचयति। पूर्वदिवसे प्रातः यजमानः स्वपालितं वृषभं नाम्ना आह्वयति। वृषभोऽपि प्रत्युत्तरं दत्त्वा सङ्केतं ददाति चेत् तदा पौर्णदर्व्यहोमोऽग्निहोत्रस्य पूर्वं करणीयः। अनन्तरं क्रीडिनेष्टिः। पश्चान्महाहवींषि, महापितृयज्ञः, त्र्यम्बकहवींषिश्च सम्पन्ना भवन्ति। एवं साकमेधपर्व समाप्तं भवति।

### (घ) शुनासीरीयपर्व

साकमेधपर्वसमाप्तेरनन्तरं द्वि-त्रि-चतुरहसु अथवा एकस्मिन् मासे वा चतुर्षु मासेषु वा यथाकामं शुनासीरीयपर्व विधेयम्।[२९] 'शुन' 'सीर' इति पदद्वयस्योक्तौ अपि आपस्तम्बादयो ऋषय एतत् इन्द्रयागरूपेण वर्णयन्ति। कात्यायनस्तु इन्द्रवायुसम्बद्धपर्व इति विशेषतया निरूपयति। यदि चतुर्मासपर्यन्तं यागः कारयितव्यश्चेत् फाल्गुनमासेऽनुष्ठानं कर्तव्यम्। अस्मिन् वैश्वदेववद् आग्नेय-सौम्य-सावित्र-सारस्वत-पौष्ण इति पञ्चयागाः, ऐन्द्राग्न-वैश्वदेव-शुनासीरीय-वायव्य-सौर्य इति अन्ये पञ्च यागा इत्याहत्य दशेष्टयो भवन्ति। देवता इन्द्राग्नी, विश्वेदेवाः, इन्द्र-शुनासीरौ, वायुः, सूर्यश्च। हविः पुरोडाशश्चरुः दुग्धं च। अत्र नवप्रयाजा भवन्ति। अन्ये सर्वे विधयो वैश्वदेवपर्वादिषु इव विधातव्याः। एवं च चातुर्मास्यपरम्परा न केवल ऋतुसम्बद्धं धार्मिककर्म अपि तु मानव-प्रकृति-दैवरूपत्रिवेणीसंविधानस्य आधारभूतं स्तम्भत्रयं भवति। अत्र प्रतियागं विशेषा नैर्गुण्यप्रकृतिसम्बद्धाः सामाजिका अध्यात्मपराश्च संहिता निहिताः। अत एव एते वैश्वदेव-वरुणप्रघास-साकमेध-शुनासीरीयादयो यज्ञा वैदिकीं पर्यावरणचेतनामध्यात्मदर्शनं जीवनमार्गञ्च उद्घोषयन्ति।

### ४.१.५ आग्रयणेष्टिः

शरद्-वसन्तयोः काले नवान्नस्योत्पत्तिर्भवति। तस्मिन् काले नवान्नस्य देवताभ्योऽग्नौ सम्यक् निवेदनाय आग्रयणेष्टिरवश्यं विधेयाऽभूदिति श्रुतिस्मृत्योः प्रतिपादनम्। एषा एव नवान्नेष्टि इति प्रसिद्धा वर्तते। शरदि नवान्नोत्पत्तेः काले नवैर्व्रीहिभिर्वसन्ते तु नवयवैराग्रयणेष्टिः कार्या इति श्रुतिः। श्यामाकस्यापि नव्यस्य समयेऽऽग्रयणेष्टिर्विधानतः

२८. कार्तिक्यां साकमेधा द्व्यहम्। (कात्यायन-श्रौतसूत्रम्, ५।६।१)

२९. शुनासीरीयमतः। यदेच्छेत्। (कात्यायन-श्रौतसूत्रम्, ५।११।१-२)

प्रकल्प्यते। श्यामाको वर्षासु प्रवर्धते। अतो वर्षासु नवश्यामाकैः, शरदि नवव्रीहिभिः, वसन्ते नवयवैः आग्रयणं कर्तव्यमिति परम्परा विद्यते। व्रीह्याग्रयणस्य श्यामाकाग्रयणस्य च एकेनैव विधिना सम्पन्नता स्मृतौ निर्दिष्टाऽस्ति। शरदृतौ व्रीह्युत्पत्ते-रनन्तरं कर्तव्यमित्युक्तम् अथवा अमावास्यायां पौर्णमास्यां वा शुभे नक्षत्रेऽपि कर्तुं शक्यते इति गृह्यसूत्रेषु निष्कर्षः। शरदि व्रीहिभिः क्रियमाणायाम् आग्रयणेष्टौ अष्टकपालपुरोडाशः, द्वादशकपालपुरोडाशः, चरुः, द्यावापृथिव्योरेककपालश्चेति हविरूपाणि भवन्ति। देवतास्तु अग्निः, इन्द्राग्नी, विश्वेदेवाः, द्यावापृथिवी च इति। श्यामाकेन क्रियमाण आग्रयणेष्टिरेकत्र वा पृथगपि विधेयाऽस्ति। अस्यां हव्यद्रव्यं नवश्यामाकनिर्मितचरुः, देवता च सोमदेवता एव। वर्षासु नवश्यामाकैर्हव्य-पदार्थैरेव होमः कर्तव्यः। देवता तत्रापि सोम एव। एवमेव वसन्ते नवान्नोत्पत्तिकाले नवैर्यवैराग्रयणेष्टिः कर्तव्या। जीर्णयवास्तत्र न गृह्यन्ते। अस्मिन् वसन्ताग्रयणेष्टौ देवताः इन्द्रः, विश्वेदेवाः, द्यावापृथिवी, हविरूपाणि यवैर्निर्मितानि त्रीणि हवींषि। एतानि सर्वाणि नवान्ननिर्मितानि भविष्यन्ति इति शास्त्रवचनम्। अन्याः सर्वा विधिविधानप्रक्रियाः सामान्ययज्ञविधेः सम्मताः। एवं प्रत्यक्षेण वा प्रतिनिधिना आग्रयणेष्टिः सम्पादनानन्तरमेव आहिताग्निना नवान्नभक्षणम् आरभणीयमिति विधिः प्रातिपदितो दृश्यते।

### **४.१.६ निरूढपशुबन्धः**

निरूढपशुबन्ध आहिताग्निसम्बद्धो यज्ञः। एष यज्ञः प्रतिवर्षमयनपरिवर्तनस्य प्रथमदिने वा अनिवार्यतया कर्तव्यः।[३०] तस्य त्रयो विकल्पाः– एककृत्वः, द्विकृत्वः, षट्कृत्वश्चेति। एकवारं यः कुर्यात् स वर्षर्तोः कस्मिंश्चित् काले कर्तुं शक्नोति। यदि द्विवारं कुर्यात् तदा उत्तरायणदक्षिणायनयोरारम्भे कर्तव्यम्। षट्कृत्वस्तु ऋत्यनुसारं कर्म, तत्रापि अमावास्यायां वा पौर्णमास्यां कर्तुमुपयुक्तम्। एवंविधः पशुयागो निरूढपशुबन्ध इति याज्ञिकैः कथ्यते। आहिताग्निना अयं यज्ञः कर्तव्य एव, अकुर्वतः प्रत्यवायो भवति इति निगदितम्। निरूढपशुबन्धः सर्वेषां पशुयज्ञानां मूलरूपम्, अयं हि अग्नीषोमीयपशुयागः सोमयागस्याङ्गतया निर्दिष्टः। तस्मादयं यज्ञः सर्वाङ्गसहितो विधिपूर्वकमेव कर्तव्य इति मान्यता विद्यते।

अस्मिन् यज्ञे हव्यपदार्थश्छागो न तु साक्षात्पशुः किन्तु वपाहृदयादिमुख्याङ्गानि हव्यरूपेण निर्दिष्टानि। अस्य देवताः इन्द्राग्नी, सूर्यः, प्रजापतिः। ऋत्विजोऽध्वर्युः, प्रतिप्रस्थाता, होता, मैत्रावरुणः, ब्रह्मा, आग्नीध्रश्चेति। प्रतिप्रस्थाता अध्वर्योः सहायकः, मैत्रावरुणो होतुः सहायकः। पशुयागारम्भे 'वैष्णवेष्टिः' इष्टितन्त्रेण क्रियते। तत आहवनीयाग्नौ यूपस्य हेतोरेकाहुतिं दत्त्वा यूपवृक्षलाभः क्रियते। तत्र भूमौ जटारूढो बहुपर्णः स्वस्थो दोषरहितः पलाशवृक्ष[३१] उपादेयः। तस्याभावे खदिर-बिल्व-रोहितादिवृक्षः स्वीकार्यः। छिन्नदेशे वा मूलच्छेदस्थाने स्थाण्वाहुतिर्दातव्या। तत ऊर्ध्वबाहुयजमानपरिमाण-मवशिष्टं काष्ठं शोधितं कृत्वा यूपो विनिर्मीयते। कात्यायनवचनानुसारं यूपच्छेदे आद्यभागः 'स्वर्वर्थः' इति स विशेषेण संरक्षणीयः।[३२] यूपखण्डो यज्ञवेदिमानीय मूलभागं विहाय अष्टकोणरूपेण शिल्पिना संस्कार्यते।

ततो वेदिं निर्माय उत्तरवेद्या मध्ये नाभिं निर्माय तत्र अग्निस्थापनं विधेयम्। आहवनीयोत्तरवेदिमग्निप्रणयनम्। अग्नेरुत्तरतः पशुयागकर्मार्थमेकश्चात्वालः खन्यते। तत्र स्फ्यः, अग्निहोत्रहवणी, वसाहोमहवणी, जुहू-द्वयम्, उपभृद्द्वयम्, पृषदाज्यधानी, आज्यस्थाल्यौ द्वे, हृदयशूलम्, कण्टकः, छुरी, कुम्भी, प्लक्षशाखा, वपाश्रपणी, औदुम्बरदण्डः, रशनाद्वयम्, स्रुवश्चेत्यादीनि स्थापनीयानि। दर्शपूर्णमासयज्ञवत् प्रोक्षण-शुद्धिकरणम्, ततः प्रयाज-अनुयाजकर्मार्थं जुह्वादिपात्रेषु आज्य-

३०. पश्विज्या संवत्सरे संवत्सरे प्रावृषि। आवृत्तिमुखयोर्वा (कात्यायन-श्रौतसूत्रम्, ६।१।१-२)

३१. पालाशं वहुलपर्णमशुष्काग्रमूर्ध्वशकलशाखं मध्याग्रोपनतमव्रणम्। खदिराभावे सोम इतरान्। (कात्यायन-श्रौतसूत्रम्, ६।१।८-९)

३२. प्रथमशकलं निदधाति। (कात्यायन-श्रौतसूत्रम्, ६।१।१३)

पृषदाज्यनिधानम्, यूपस्थापनम्, आज्यपूर्णपात्राणां वेद्या: समीपे स्थापनम् , यूपस्य खातेअवटे स्थापनं च कर्तव्यम् । यूपे घृतस्निग्धश्चषालः स्थाप्यते । कुशरज्ज्वा यूपस्य आवरणम्, पवित्रतासंस्करणम् च । पशूपाकरणं ततः पूर्णवयस्कोऽच्युत-दन्तो नरपशुः(छागः) सुसंस्कृतो यूपस्य समीपं नीयते । तत्र देवताहविर्न्यासपूर्वकान् मन्त्रान् उच्चारयेत् 'अग्नये त्वोपाकरोमि', 'इन्द्राग्नीभ्यां त्वा जुष्टमुपाकरोमि' इत्यादीन् । एतस्मिन्ननुष्ठाने यजमानो यूपमालभ्य तस्य समीपे तिष्ठति । अध्वर्युः प्रैष इत्युक्तं शृण्वन् अग्निना सम्बद्धा ऋचः उच्चारयति । अध्वर्युरग्निमन्थनं कृत्वा निर्गताग्निमाहवनीयकुण्डे (मुख्यहवनकुण्डे) प्रतिष्ठा-पयति । ततो रज्जुबन्धेन बद्धः पशुर्यूपतो निकटे मन्थितजलेन अभिषिच्यते, यजमानः पशुश्च एकस्मिन् स्थले स्थितौ च भवतः । तत एकादश प्रयाजहवनयज्ञाः सम्पद्यन्ते । एतेषु दश प्रयाजाः पश्चाङ्गच्छेदनपूर्वमेकः पश्चात् क्रियते । एते प्रयाजाः क्रमशः समिध, तनूनपात्/नराशंसः, इडा, बर्हिः, द्वारदेव्यः, दैव्योपसांकता, दैव्यहोत्रः (ऋत्विज्), तृतीयादेव्याः (सरस्वती, इडा, भारती), त्वष्टा, वनस्पतिश्चेत्यादीनां देवतानां कृते समर्पिता भवन्ति । एषु सर्वेषु प्रयाजेषु आज्यपदार्थो मुख्यं हवनद्रव्यं भवति । आहवनीयाग्नेः परिक्रमया सह आग्निध्रस्तथा होता अध्रिगुप्रैषादीन् मन्त्रान् उच्चार्य उल्मुकं गृहीत्वा समागच्छतः । शमिता पशुं निगृह्य अनन्तरमनुगच्छति । उभौ शामित्रदेशे आगत्य आग्निध्रः उल्मुकं संस्थाप्य पुनः प्रत्यागच्छतः । शमिता पशुं प्रत्यागतदिशायामुत्तरपादे स्थित्वा अनुशासनेन अर्धमूर्छितं (निश्चलं) करोतु ।[३३] निश्चलितं पशुं संज्ञपनहवनयज्ञेन च प्रायश्चित्तहवनयज्ञेन च अध्वर्युर्वपाश्रपणीं निष्कासयति । यजमानसहितं पशुञ्च जलं प्रक्षिप्य विविधाङ्गानि शुद्धीकरोति तथा उदरस्य दक्षिणभागे स्थितायां वपायां वपाश्रपणीं स्थापयति । यजमानसहितोऽध्वर्युः आहवनीयाग्निकर्ष्णे प्रतिप्रस्थाता वपाश्रपणीं प्रदाय स्थापयति । वपां विधिपूर्वकं पक्वां[३४] कृत्वा वेदिमध्ये पूर्वं संस्थाप्य प्लक्षशाखायामुपरि एकादश प्रयाजं आज्यभागं च समर्पयति । जलाभिषेकं सुवर्णकणैः सम्पूर्य आहवनीयाग्नौ इन्द्राग्नी, सूर्यः अथवा प्रजापतिनामधेयेन हवनं क्रियते । वपाश्रपणीमाहवनीयाग्नौ प्रक्षिप्य ऋत्विक् यजमानश्च चात्वालस्नानं कुरुतः । पशुनाम्ना पुरोडाशयज्ञं कृत्वा हृदयादीनि महत्त्वपूर्णानि चाङ्गानि निष्कास्य विधिपूर्वकं हूयन्ते। शामित्राग्नौ मृद्भाण्डे पक्वानि अङ्गानि अन्यहव्य-पदार्थेभ्यः पृथक् स्थाप्यन्ते । एषु विशेषाङ्गेषु हृदयम्, जिह्वा, वक्षः, सव्यस्य बाहोः प्रथमं नडकम्, दक्षिणपार्श्वम्, वामपार्श्वम्, यकृत्, वृक्कौ, गुदमध्यम्, दक्षिणा श्रोणिः, सव्यं दोः, सव्या श्रोणिः, गुदतृतीयं चेत्यङ्गानि सम्मिलन्ति ।

पाकप्रक्रियां ऋत्वि पशुपुरोडाशयज्ञाय कुर्वन्ति। ततः पाकपात्रे पक्वानि अङ्गानि छुरिकया छेदयित्वा जुह्वां संस्थाप्य आहवनीयाग्नौ हूयन्ते । अस्मिन्क्रमे जुहूमुखं पुच्छं च विशेषत आवृणोति । प्रतिप्रस्थाता मुख्यं यागीयमन्त्रमुच्चार्य आहवनीयाग्नौ मांसं समर्पयति। ततो हृदयादिगुदान्तानि एकादशाङ्गानि एकैकं जुहोर्निष्कास्य क्रमश आहवनीयाग्नौ होम्यन्ते । दर्शपूर्णमासे नारिष्टहोमो वनस्पतिदेवाय पृषदाज्यहोमश्च क्रियते । अन्याङ्गानि जुहौ संस्थाप्य आश्रावणं कृत्वा स्विष्टकृत्देवाय समर्पितानि भवन्ति। ततः सर्वे ऋत्विजा यजमानश्च होमं कृत्वा अवशिष्टभोजनं विधिपूर्वकं भुञ्जते। तत्पश्चात् एकादश अनुयाजहवनयज्ञाः सम्पद्यन्ते ।

अनुयाजारम्भे प्रतिप्रस्थाता यज्ञारम्भे पृथक् स्थापितं गुदास्थानस्य तृतीयं खण्डं एकादशखण्डेषु विभज्य तानि शामित्रे उत्तरदिशायां वेद्यां स्थापयति । ततस्तानि एकैकं हस्तेन होम्यन्ते । प्रारम्भे पृथक् स्थापितं पशुपुच्छं यजमानपत्नी संयाजहोमं[३५] कृत्वा समापयति । यज्ञे अवशिष्टानि आवश्यकानि कर्माण्यपि यथाशक्ति सम्पाद्यन्ते । अन्ते यजमानो यूप-सन्निकृष्टः संस्थाजपं कृत्वा निरूढपशुबन्धयज्ञं समापयति ।

---

३३. तस्मिन्नेनं निघ्नन्ति प्रत्यक्शिरसमुदक्पादम् । प्राक्शिरसं वा । सङ्गृह्य मुखं तमयन्त्यवास्यमानम् (कात्यायन-श्रौतसूत्रम्, ६।५।१५-१७)

३४. उत्तरतस्तिष्ठन्प्रतप्य वपा, मन्तरा यूपाग्नी हृत्वा दक्षिणतः प्रतिप्रस्थाता श्रपयति परीत्य । (कात्यायन-श्रौतसूत्रम्, ६।६।१५)

३५. जाघन्या पत्नीसंयाजनम् । (कात्यायन-श्रौतसूत्रम्, ६।९।१४)

### ४.१.७ सौत्रामणी

सौत्रामणी यज्ञो वैदिकपरम्परायामुल्लिखितः "सौत्रामण्यां सुरां पिबेत्" इत्यनुसारेण विशेषयज्ञोऽस्ति। एष मुख्यत इन्द्रदेवस्य स्तुत्यर्थं तृप्त्यर्थञ्च सम्पाद्यते। 'सौत्रामणी' इति शब्दः सूत्रामा + अण् + ङीप् प्रक्रियया सिध्यति। एष यज्ञ इन्द्रस्य सुरापानसङ्गेन सम्बद्धः। एतस्मिन् यज्ञे ब्राह्मणेऽपि सुरापानं कृत्वा पतितो न भवति इति निर्दिष्टम्।[३६] सौत्रामणी यज्ञः सामान्यतः सोमपानानन्तरं उत्पन्नदोषस्य निवारणार्थं मानसिकशरीरिकशुद्ध्यर्थञ्च क्रियते। वैदिकसाहित्ये कथ्यते यत् इन्द्रः सोमपानानन्तरं मादकतां प्राप्तवान् तस्य प्रायश्चित्ताय तेन सौत्रामणीयज्ञः सम्पादितः। इत्यतो यज्ञोऽसौ इन्द्रस्य प्रायश्चित्तीययज्ञ इति नाम्नापि ख्यातो जातः।

सौत्रामणी पशुयज्ञोऽस्ति। एष द्विविधः– स्वतन्त्रः (चरकसौत्रामणी) अङ्गभूतः (कौकिलसौत्रामणी) च। यः सौत्रामणी चयनयज्ञानन्तरं अङ्गरूपेण क्रियते स अङ्गभूतः। यदा स्वनिर्दिष्टो भवति स स्वतन्त्रः। स्वतन्त्रः सौत्रामणीयज्ञः करणीयः केवलं ब्राह्मणेनैव। अङ्गभूतः सौत्रामणीयज्ञस्तु करणीयः क्षत्रियेण वैशयेन वापि। एतस्य त्रयो भेदाः सन्ति– नित्यः, काम्यः, नैमित्तिकश्च। एषु यज्ञेषु त्रयः पशवो भवन्ति– अजः, मेषः, ऋषभश्च। देवता अपि तिस्र एव भवन्ति– अश्विनीद्वयम्, सरस्वती, इन्द्रश्च। धूम्रवर्णोऽजः अश्विनीदेवतायै, मेषः सरस्वतीदेवतायै, ऋषभश्च इन्द्रदेवतायै बलिप्रदानाय समर्प्यते। बौधायनापस्तम्बादीनि श्रौतसूत्राणि तैत्तिरीयसङ्ग्रहश्च एतेषां पशूनां निरूढपशुबन्धविधिना समर्पणं निर्दिशन्ति। पशुभागस्य (वपा) होमानन्तरं सुरापानं क्रियते। तस्य विधिर्ब्राह्मणग्रन्थेषु श्रौतसूत्रेषु च वर्णितः। कलियुगे एष यज्ञो निषिद्धो जातः। तस्माद् विकल्परूपेण आपस्तम्बादयो ऋषयः पयोग्रहणस्य व्यवस्थां कृतवन्तः। इदानीं यज्ञोऽयं विकल्पानुसारं सम्पाद्यते। एषु यज्ञेषु त्रयो ग्रहाः सन्ति। पशुबन्धयज्ञेषु स्थिता देवताः सौत्रामणीयज्ञेष्वपि देवता भवन्ति। एतेषां पशूनां संज्ञपनं कृत्वा पितॄणामुपस्थितावेव पशुपुरोडाशयज्ञः क्रियते। तत्र त्रयः पुरोडाशाः इन्द्राय, सवित्रे, वरुणाय च कृताः। ततोऽङ्गयज्ञान् कृत्वा सौत्रामणीयज्ञः पूर्णो भवति। अन्ते वारुणएककपालयज्ञं कृत्वा अवभृथस्नानं कृत्वा अग्नीन् प्रतिष्ठाप्य गृहं प्रत्यागच्छेत्। एष यज्ञश्चरकसौत्रामणी इति कथ्यते।

कौकिलसौत्रामणीयज्ञे ऐन्द्रः, अश्विनः, सारस्वतः, ऐन्द्रः, ऐन्द्रो वायुश्चेति पञ्चानां पशूनां बलिप्रदानं क्रियते। अस्यैव चरकसौत्रामणी कौकिलसौत्रामणी च भेदः। शतपथब्राह्मणानुसारेण इन्द्रः सोमपानानन्तरं मादको भवति।[३७] तस्य प्रायश्चित्तरूपेण सौत्रामणीयज्ञः सम्पाद्यते। एष सोमयज्ञानन्तरं सम्पाद्यते, प्रायश्चित्तीययज्ञ इत्यपि कथ्यते। एष इन्द्रतुल्येन उन्मत्तवीरपुरुषेणापि समाजे पुनः संतुलनं स्थापयितुं संयमितं जीवनं यापनीयमिति प्रतिपादयति। तैत्तिरीयब्राह्मणे सौत्रामणी यज्ञस्य विस्तृतविधिः वर्णितः। तत्र यज्ञस्त्रिषु दिनेषु सम्पाद्यन्ते। विशेषब्राह्मणानां सहभागेन क्रियते। अत्र प्रयोक्तव्या सुरा विशेषविधिना निर्मीयते सीमितमात्रायां देवताभ्यः समर्प्यते। वैदिकसमाजे सौत्रामणीयज्ञेन ऋषयो मद्यपानानन्तरं प्रतिकूलफलस्य निवारणाय च सम्यक् सन्देशं प्रदत्तवन्तः। अयं यज्ञ इन्द्रस्य माध्यमेन मानवीयदोषमीमांसा च प्रदर्शयति। तस्य समाधानार्थं धार्मिकोपायं च उपस्थापयति। एवं सौत्रामणीयज्ञो वैदिकसंस्कृतौ अद्वितीयः पक्षः। यः सोमरसस्य, इन्द्रपूजायाः प्रायश्चित्तीयकर्माणां च संयोजनं प्रतिपादयति।

---

३६. सौत्रामण्यां कुलाचारे ब्राह्मणःप्रपिबेत् सुराम्। अन्यत्र कामतःपीत्वा पतितस्तु द्विजो भवेत्॥ (संस्कृत-शब्दकोशः)

३७. विश्वरूपो वै त्वाष्ट्रमिन्द्रोऽहन्। तं त्वष्टा हतपुत्रोऽभ्यचरत्सोऽभिचरणीयमपेन्द्रं सोममाहरत्तस्येन्द्रो यज्ञवेशसं कृत्वा प्रासहा सोममपिबत्स विश्वङ् व्यार्च्छत्तस्येन्द्रियं वीर्यमङ्गादङ्गादस्रवत्। (शतपथब्राह्मणम्, १२।७।१।१)

## ५. निष्कर्षः

'हवि' 'यज्ञ' शब्दयोः संयोजनेन निर्मितो 'हविर्यज्ञ' शब्दो वैदिकसभ्यताया मूलं बिभर्ति। एष मानवजीवनं शुद्धं संयमितं धर्मपरायणं च कर्तुं साधनं च भवति। 'हविः' इत्यनेन यज्ञे अग्निकुण्डे घृतचरुप्रभृतिहवनीयद्रव्याः प्रतिपाद्यन्ते। 'यज्ञः' इत्यनेन च सकामनिष्कामभावेन परमेश्वरं देवतां वा विशेषतया पूजयितुं विहितानि समर्पणार्हधार्मिककर्माणि च प्रकाश्यन्ते। हविर्यज्ञा वैदिकसनातनधर्मस्य अभिन्नाङ्गानि सन्ति। एतेषां यज्ञानां धार्मिक-सांस्कृतिक-सामाजिक-दर्शनिकपक्षाणां प्रकाशो दृश्यते। हविर्यज्ञानां धार्मिका-ऽऽध्यात्मिक-वैज्ञानिकदृष्टिषु मूलं लक्ष्यं केवलमीश्वरीयकृपाप्राप्तिः पारलौकिकानन्दप्राप्तिर्वेति न किन्तु प्राकृतिकसंतुलनस्य संरक्षणम्, पर्यावरणशुद्धिसंवर्धनम्, मानसिक-आध्यात्मिकशुद्धेश्च साधनम्। वैज्ञानिकदृष्ट्या अपि वैदिकयज्ञेषु उच्चारितमन्त्राणां ध्वनिः, हवनसामग्रीणां रासायनिकप्रभावः, वातावरण-परिवर्तनञ्च विशेषतया सूच्यन्ते। एते विविधहविर्यज्ञा यजुर्वेदे निर्दिष्टाः सन्ति। एते यज्ञा नित्यनैमित्तिककाम्यभेदेन त्रिविधाः सन्ति। नित्ययज्ञाः प्रतिदिनं वा निश्चितकालावधौ क्रियन्ते यथा अग्निहोत्रम्। नैमित्तिको यथा– ग्रहण-श्राद्धादयो विशेषकाले सम्पाद्यन्ते। काम्य इच्छितफलप्राप्त्यर्थं क्रियते यथा– पुत्रेष्टिः। एतान् यज्ञान् सम्पादितुं दक्षयाज्ञिकब्राह्मणानां विशेष-मण्डपानां यज्ञवेदी-होमकुण्डानाञ्च निर्माणं आवश्यकं भवति। एतेषां वैदिकयज्ञानां उद्भवो ऋग्वेदकालादेव दृश्यते। यजुर्वेदे यज्ञकर्मणां विधिः, मन्त्रः, हवनीयसामग्री, नियमाश्च प्रतिपादिता विद्यन्ते। सामवेदे मन्त्रसंगीतयुक्तस्य यज्ञनिःसर्गस्य वर्णनमस्ति। अथर्ववेदे यज्ञस्य औषधीयतान्त्रिकपक्षश्च प्रकाशितोऽस्ति। ब्राह्मणग्रन्थेषु यज्ञविधेर्विस्तारो विहितः। गृह्यसूत्रेषु धर्मसूत्रेषु च गृहस्थजीवने यज्ञनिर्देशस्य नियमेन सह व्याख्या कृता दृश्यते। वैदिकयज्ञा न केवलं धार्मिक-सांस्कृतिक-पौरोहित्य-सम्पादनात्मककर्माणि अपि तु आध्यात्मिकपरितोष-पर्यावरणप्रशोधन-सामाजिकहितसाधन-विश्वमानवकल्याणकारिकार्य-विधौ च प्रभावकारिणः प्रमाणिताः सन्ति।

## सन्दर्भग्रन्थसूची


*अथर्ववेदसंहिता,* (सन् १९९०), (सम्पा०) रामस्वरूपः शर्मा, वाराणसी : चौखम्बा विद्याभवनम्।

*अष्टाध्यायी,* (२०१४), नरेश झा, वाराणसी : चौखम्बा सुरभारती प्रकाशनम्।

*आपस्तम्ब-श्रौतसूत्रम्,* (सन् १८९३), (सम्पा०) महादेवः एल्. शास्त्री, मैसूर : गवर्मेन्ट् ब्राञ्च प्रेस।

*आश्वलायन-श्रौतसूत्रम्,* (सन् १९१७), (सम्पा०) गणेश शास्त्री गोखले, पूना : आनन्दाश्रम।

*ऐतरेयब्राह्मणम्,* (सन् १९७९), (सम्पा०) काशीनाथ शास्त्री, पुणे : आनन्दाश्रम।

ऋग्वेदसंहिता, (सन् २०२४), (सम्पा०) श्रीपादः दामोदर सातवलेकरः, दिल्ली : नागप्रकाशनम्।

*कल्याण,* वेद-कथाङ्क (सन् १९९९), वर्ष ७३, गोरखपुर : गीताप्रेस।

*कात्यायन-श्रौतसूत्रम्,* (सन् १९८७), (सरला भूमिका), (सम्पा०) विद्याधर शर्मा गौडः, काशी : अच्युतग्रन्थमाला कार्यालयः।

*गौतमधर्मसूत्राणि*, (सन् १९६६), (सम्पा०) उमेशचन्द्र पाण्डेयः, वाराणसी : चौखम्बा संस्कृतसिरिज अफिस।

*तैत्तिरीयसंहिता*, (सन् १९९९), (सम्पा०) श्रीपादः दामोदर सातवलेकरः, पारडी गुजरात : स्वाध्यायमण्डलम्।

*पद्ममहापुराणम्*, (सं० २०७६), गोरखपुर : गीताप्रेस।

*मनुस्मृतिः*, (सन् २००८), (सम्पा०) शिवराज आचार्य कौण्डिन्न्यायन, वाराणसी : चौखम्बा विद्याभवन ।

*मत्स्यमहापुराणम्*, (सं० २०७६), गोरखपुर : गीताप्रेस ।

*याज्ञवल्क्यस्मृति*, (सन् १९९८), दिल्ली : चौखम्बा संस्कृत प्रतिष्ठानम् ।

वैदिक धर्म मूल रूपमा, (सं०२०८० तृ.सं.), शिवराज आचार्य कौण्डिन्न्यायन, काठमाडौं : स्वाद्ध्यायशाला ।

*शतपथब्राह्मणम्*, (सन् १९७०), (तृतीयो भागः) (टीका०) गंगाप्रसाद उपाध्यायः, नई दिल्ली : प्राचीन वैज्ञानिकाध्ययन अनुसन्धान संस्थानम् ।

*शुक्लयजुर्वेदमाध्यन्दिनसंहिता*, (सन् १९७१), (सम्पा०) जगदीशलाल शास्त्री, वाराणसी : मोतीलाल वनारसीदासः ।

*श्रीमद्भगवद्गीता,* (सं० २०८०), गोरखपुर : गीताप्रेस ।

*श्रीमद्भागवतमहापुराणम्*, गोरखपुर : गीताप्रेस ।

*बृहत् संस्कृत- नेपाली शब्दकोश*, (सं० २०७३), फणीन्द्रप्रसाद पाण्डेय, विद्यार्थी प्रकाशन प्रा.लि., काठमाडौं, नेपाल ।

*सामवेदसंहिता*, (सन् २०२४), (सम्पा०) श्रीपादः दामोदर सातवलेकरः, दिल्ली : नागप्रकाशनम् ।